"दक्षिणो मारुतः श्रेष्ठश्चक्षुष्यो बलवर्द्धनः ॥")

चक्षुष्या, स्त्री, (चक्षुष्य+टाप् ।) कुलत्थिका । सुभगा । इति मेदिनी । ये । ८२ ॥ अजशृङ्गी । अरण्यकुलत्थिका । इति राजनिर्घण्टः ॥

चघ, न घातने । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) न, चघ्नोति । इति दुर्गादासः ॥

चङ्कुरं, क्ली, (चकति तृप्नोत्यनेन । चक+उरच् । इदित्वान्नुम् ।) यानमात्रम् । तत्पर्य्यायः । घोरणम् २ । इति त्रिकाण्डशेषः ॥

चङ्कुरः, पुं, (चक्यते तृप्यतेऽनेन । चकि+उरच् ।) इदित्वान्नुम् ।) रथः । वृक्षः । इति मेदिनी । रे । १५३ ॥

चङ्क्रमणं, क्ली, (पुनःपुनरतिशयेन वा क्राम्यतीति । चङ्क्रम+भावे ल्युट् ।) पुनःपुनर्भ्रमणम् । (यथा, भागवते । ३ । २१ । ५० ।

"नूनं चङ्क्रमणं देव ! सतां संरक्षणाय ते ।
वधाय चासतां यत्त्वं हरेः शक्तिर्हि पालिनी ॥")

अतिशयभ्रमणम् । इति व्याकरणम् ॥ (यथा, सुश्रुते सूत्रस्थाने १९ अध्याये ।

"स्थानासनं चङ्क्रमणं यानयानातिभाषणम् ॥")

अनतिदेहपीड़ाकारकचङ्क्रमणस्य गुणाः । आयुर्बलमेधाग्नीन्द्रियशुद्धिकारित्वम् । सदोपानद्रहितपादचङ्क्रमणदोषाः । अनारोग्यत्वम् । अनायुष्यत्वम् । इन्द्रियदृष्टिनाशित्वञ्च । इति राजवल्लभः ॥

चङ्गः, त्रि, शोभनः । दक्षः । इति मेदिनी । गे । ७॥ (पुं, राजमन्त्रिविशेषः । यथा, राजतरङ्गिण्याम् ।

"अन्तरङ्गाश्च चङ्गाद्या येऽभूवंस्तत्र मन्त्रिणः ।
तैः क्षीवदासितन्तूर्णौ वस्तैः शस्त्रान्वितैरपि ॥")

चचेण्डा, स्त्री, (चि+बाहुलकात् डः । चं उपचीयमानं अण्डवत् फलं अस्याः ततो निपातनात् साधुः ।) फललताविशेषः । चिचिड़ा इति भाषा । तत्पर्य्यायः । वेमकूलः २ श्वेतराजी ३ बृहत्फलः । अस्या गुणः । पटोलगुणात् किञ्चिन्न्यूनत्वम् । विशेषात् शोषिणो हितत्वञ्च । इति मदनविनोदः ॥

चच्चत्पुटः, पुं, (चच्चत् गुरुलघूनां लयविशेषाणां पुटं द्वन्द्वं यत्र ।) तालप्रभेदः । यथा,—

"ताले चच्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघु प्लुतम् ॥"
इति सङ्गीतदामोदरः ॥

चच्चत्पुटोऽपि कुत्रापि पाठः ॥

चच्चरी, स्त्री, पुं, (चर्च्चर्य्यते पुनः पुनरतिशयेन वा चरति भ्राम्यतीति । चर+यङ् लुक् ततो टक् टित्वात् ङीप् च ।) भ्रमरी । यथा,—

"करी वरी भरीति चेद्दिशं सरी सरीति काम् ।
स्थिरी चरी करीति चेन्न चच्चरीति चच्चरी ॥"
इत्युद्भटः ॥

चच्चरीकः, पुं, (चरति पुनःपुनरिति "चर्च्चरीकादयश्च ।" उणां । ४ । २० । इति यङ्लुगन्तेन साधुः ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

चञ्चलं त्रि, (चञ्चं गतिं लातीति । ला+कः ।) अस्थिरम् । (यथा, हरिवंशे । ६४ । ७ ।

"एव वत्सान् पालयन्तौ शोभमानौ महावनम् ।
चञ्चूर्य्यन्तौ रमन्तौ स्म किशोराविव चञ्चलौ ॥")

तत्पर्य्यायः । चलनम् २ कम्पनम् ३ कम्प्रम् ४ चलम् ५ लोलम् ६ चलाचलम् ७ तरलम् ८ पारिप्लवम् ९ परिप्लवम् १० । इत्यमरः । ३ । १ । ७५ ॥ चपलम् ११ चटुलम् १२ । इति तट्टीका ॥ वायौ पुं । इति मेदिनी । ले । ९० ॥

चञ्चला, स्त्री, (चञ्चं लाति । ला+कः टाप् च । यद्वा चञ्चलं चाञ्चल्यं अस्त्यस्याः इति अच् ।) लक्ष्मीः । विद्युत् । इति मेदिनी । ले । ९० ॥ पिप्पली । इति शब्दचन्द्रिका ॥ (वर्णवृत्तविशेषः । यथा, शब्दार्थचिन्तामणिः ।

"तूर्य्यतालपञ्चिराजमेरुहारनायकेन ।
चामरध्वजेन चापि मण्डिता सुवर्णकेन ॥
वर्णितातिसुन्दरेण पन्नगेन्द्रपिङ्गलेन ।
चञ्चला चकोरचारुलोचने सुमङ्गलेन ॥")

चञ्चा, स्त्री, (चञ्च+अच्+टाप् ।) नलनिर्म्मिता । चाच इति भाषा । (चञ्चेव मनुष्यः । इति इवार्थे कन् ततः "लुम्मनुष्ये ।" ५ । ३ । ९८ । इति कनो लुप् ।) तृणनिर्म्मितपुरुषः । इति मेदिनी । चे । ५ ॥

चञ्चुः, पुं. (चन्च+बाहुलकात् उः ।) गोनाड़ीचः । स तु नाड़ीचशाकः । एरण्डवृक्षः । इति मेदिनी । चं । ५ ॥ मृगः । इति शब्दरत्नावली ॥ रक्तैरण्डः । क्षुद्रचञ्चुवृक्षः । इति राजनिर्घण्टः ॥

चञ्चुः, स्त्री, (चञ्चति प्राप्नोति गृह्णाति भक्ष्यमनया ।) पक्षिणामोष्ठः । पाखिर ठोँट् इति भाषा । (यथा, चातकाष्टके । ६ ।　　[जानीमहे

"भ्रातश्चातक ! पातकं किमपि ते सम्यङ् न
यत्तेऽस्मिन्न पतन्ति चञ्चुपुटके द्वित्राः पयो-
बिन्दवः ॥")

तत्पर्य्यायः । त्रोटिः २ । इत्यमरः । २ । ५ । ३६ ॥ चञ्चूः ३ त्रोटी ४ चञ्चुका ५ । इति शब्दरत्नावली ॥ सृपाटिका ६ । इति हेमचन्द्रः ॥ पत्रशाकविशेषः । तत्पर्य्यायः । विजला २ चञ्चूः ३ कलभी ४ चीरपत्रिका ५ चञ्चुरः ६ चञ्चुपत्रः ७ सुशाकः ८ क्षेत्रसम्भवः ९ । अस्या गुणाः । मधुरत्वम् । तीक्ष्णत्वम् । कषायत्वम् । मलशोधनत्वम् । गुल्मोदरविबन्धार्शोग्रहणीनाशित्वञ्च ॥

"चिञ्चश्चञ्चुश्चञ्चुकी च दीर्घपत्रा सतिक्तिका ।
चञ्चुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा ।
धातुपुष्टिकरी बल्या मेध्या पिच्छिलिका स्मृता ॥"
इति भावप्रकाशः ॥

तस्या बीजस्य गुणाः । कटुत्वम् । उष्णत्वम् । गुल्मशूलोदररोगविषत्वग्दोषकण्डूखर्जूकुष्ठनाशित्वञ्च । इति राजनिर्घण्टः ॥ (व्यवहारोऽस्य यथा,

"आमे परिणते यस्तु विबन्धमतिसार्य्यते ।
सशूलपिच्छमल्पाल्पं बहुशः संप्रवाहिकम् ॥
तं मूलकानां यूषेण बदराणामथापि वा ।
उपोदकायाः चौरिण्या यवान्या वास्तुकस्य वा ॥
सुवर्चलायाश्चञ्च्वा शाकेनावल्गुजस्य वा ॥"
इति चरके चिकित्सास्थाने दशमेऽध्याये ॥)

चञ्चुका, स्त्री, (चञ्चु+स्वार्थे कन् टाप् च ।) चञ्चुः । पक्षिणामोष्ठः । इति शब्दरत्नावली ॥

चञ्चुपत्रः, पुं, (चञ्चाकारं पत्रमस्य) चञ्चुशाकः । इति राजनिर्घण्टः ॥

चञ्चुभृत्, पुं, स्त्री, (चञ्चुं बिभर्त्तीति । भृ+क्विप् ।) पक्षी । इति त्रिकाण्डशेषः ॥

चञ्चुमान्, [त्] पुं, स्त्री, (चञ्चुरस्त्यस्येति । नित्ययोगे मतुप् ।) पक्षी । इति हारावली ॥

चञ्चुरः, पुं, (चञ्चति चञ्चुवदाकृतिं गच्छतीति । चञ्च गतौ+बाहुलकात् उरच् ।) चञ्चुशाकः । इति राजनिर्घण्टः ॥ (दक्षः । यथा, काशीखण्डे । १० । ४६ ।

"विज्ञाताखिलशास्त्रार्थो लौकिकाचारचञ्चुरः ।
कदाचिच्चिन्तयामास हृदि ध्यात्वा महेश्वरम् ॥")

चञ्चुसूचिः, पुं, (चञ्चुः सूचिरिव यस्य ।) कारण्डवपक्षी । तत्पर्य्यायः । सुरङ्गः २ पीततुण्डः ३ । इति त्रिकाण्डशेषः । मरुलः ४ चञ्चुसूचिकः ५ । इति हेमचन्द्रः । ४ । ४०७ ॥

चञ्चुसूचिकः, पुं स्त्री, (चञ्चुसूचि+स्वार्थे कन् यद्वा चञ्चुः सूचिरिव यस्य इति कप् ।) चञ्चुसूचिपक्षी । इति हेमचन्द्रः । ४ । ४०७ ॥

चञ्चूः, स्त्री, (चञ्चु+"ऊङुतः ।" ४ । १ । ६६ । इत्यस्य "अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम् ।" इति वार्त्तिकोक्त्या ऊङ् ।) चञ्चुः । इति हेमचन्द्रः ॥

चट, भेदे । इति कविकल्पद्रुमः । (भ्वां-परं-सकं-सेट् ।) चटति । इति दुर्गादासः ॥

चट, क वधे । भेदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, चाटयति । इति दुर्गादासः ॥

चटकः, पुं, (चटति भिनत्ति धान्यादिकं चञ्चुपुटेनेति । चट भेदे+"नन्दिग्रहीति ।" ३ । १ । १३४ । इति पचादित्वादच् ततः स्वार्थे कन् ।) पक्षिविशेषः । चटा इति भाषा ॥ (यथा, देवीभागवते । १ । ४ । ८ ।

"वीक्ष्य प्रेमाद्भुतं तत्र बाले चटकयोस्तदा ।
व्यासश्चिन्तातुरः कामं मनसा समचिन्तयत् ॥")

तत्पर्य्यायः । कलविङ्कः २ । इत्यमरः । २ । ५ । १८ ॥ चित्रपृष्ठः ३ गृहनीड़ः ४ दृष्यायणः ५ । इति हारावली ॥ कामुकः ६ नीलकण्ठकः ७ कालकण्ठकः ८ कामचारी ९ । इति जटाधरः ॥ कलाविकलः १० । इति शब्दरत्नावली ॥ तन्मांसगुणाः । शीतत्वम् । लघुत्वम् । शुक्रबलप्रदत्वञ्च ।
तद्वच्चारण्यचटकं तत् क्रव्यं लघु पथ्यदम् ॥
इति राजनिर्घण्टः ॥

("चटकाः श्लेष्मलाः स्निग्धा वातघ्नाः शुक्रलाः परम् ।
गुरूष्णस्निग्धमधुरा वर्गाश्चातो यथोत्तरम् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥

"चटका मधुराः स्निग्धा बलशुक्रविवर्द्धनाः ।
सन्निपातप्रशमनाः शमना मारुतस्य च ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)